# ॥ चन्द्राष्टाविंशतिनामस्तोत्रम् ॥
# Candrāṣṭāviṁśatināma Stotram

श्रीगणेशाय नमः ।

śrīgaṇeśāya namaḥ |

अस्य श्रीचन्द्राष्टाविंशतिनामस्तोत्रस्य । गौतम ऋषिः ।

asya śrīcandrāṣṭāviṁśatināmastotrasya | gautama ṛṣiḥ |

सोमो देवता । विराट् छन्दः । चन्द्रप्रीत्यर्थे जपे विनियोगः ॥

somo devatā | virāṭ chandaḥ | candraprītyarthe jape viniyogaḥ ||

चन्द्रस्य शृणु नामानि शुभदानि महीपते ।

candrasya śṛṇu nāmāni śubhadāni mahīpate |

यानि श्रुत्वा नरो दुःखान्मुच्यते नात्र संशयः ॥ १ ॥

yāni śrutvā naro duḥkhānmucyate nātra saṁśayaḥ || 1||

सुधाकरश्च सोमश्च ग्लौरब्जः कुमुदप्रियः ।

sudhākaraśca somaśca glaurabjaḥ kumudapriyaḥ |

लोकप्रियः शुभ्रभानुश्चन्द्रमा रोहिणीपतिः ॥ २ ॥

lokapriyaḥ śubhrabhānuścandramā rohiṇīpatiḥ || 2||

शशी हिमकरो राजा द्विजराजो निशाकरः ।
**śaśī himakaro rājā dvijarājo niśākaraḥ |**
आत्रेय इन्दुः शीतांशुरोषधीशः कलानिधिः ॥ ३ ॥
**ātreya induḥ śītāṁśuroṣadhīśaḥ kalānidhiḥ || 3||**

जैवातृको रमाभ्राता क्षीरोदार्णवसम्भवः ।
**jaivātṛko ramābhrātā kṣīrodārṇavasambhavaḥ |**
नक्षत्रनायकः शम्भुशिरश्चूडामणिर्विभुः ॥ ४ ॥
**nakṣatranāyakaḥ śambhuśiraścūḍāmaṇirvibhuḥ || 4||**

तापहर्ता नभोदीपो नामान्येतानि यः पठेत् ।
**tāpahartā nabhodīpo nāmānyetāni yaḥ paṭhet |**
प्रत्यहं भक्तिसंयुक्तस्तस्य पीडा विनश्यति ॥ ५ ॥
**pratyahaṁ bhaktisaṁyuktastasya pīḍā vinaśyati || 5||**

तद्दिने च पठेद्यस्तु लभेत्सर्वं समीहितम् ।
**taddine ca paṭhedyastu labhetsarvaṁ samīhitam |**
ग्रहादीनां च सर्वेषां भवेच्चन्द्रबलं सदा ॥ ६ ॥
**grahādīnāṁ ca sarveṣāṁ bhaveccandrabalaṁ sadā || 6||**

॥ इति श्रीचन्द्राष्टाविंशतिनामस्तोत्रं सम्पूर्णम् ॥
**|| iti śrīcandrāṣṭāviṁśatināmastotraṁ sampūrṇam ||**